1

वेदान्तसार टीका

ॐ श्रीमते रामानुजाय नमः ॐ सत्यं ज्ञानमनंतं परि[…]आनंदं […]यमन्ततनिश्चसच्चित्स्थितमप्यपं वंदे १
वाणीकायमनोभिः श्रीगुरुदिव्यागुरून्नमस्कृत्य […]तां मंदारटीकां कुर्वे श्रद्धावशाद्यथाबुद्धि २ चिकीर्षितस्य ग्रं
थस्याविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनफलं विशिष्टशिष्टाचारानुमितस्मृतिपरिकल्पितश्रु
तिबोधितकर्तव्यताकं स्वाभिमतदेवतातत्त्वानुसंधानात्मकं मंगलमाचरन् खंडेत्याद्युक्तश्लोकेन आत्मानमा
श्रय इत्यन्वयः यद्यपि ग्रंथकरणादिकार्यारंभे गणेशसरस्वत्यादिदेवताभेदं विघ्नविघातकं विद्यास्फूर्तिप्र
दत्वेन प्रसिद्धमनुसंधानं कुर्वंति विशिष्टास्तथापि षड् ह्येव सर्वे देवा इतिश्रुते रात्मन एव सर्वदेवतात्मकत्वा

ॐ श्रीमते रामानुजाय नमः अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधार[…]मभीष्टसिद्धये १

वगमादात्मानुसंधाने सति सर्वदेवतानुसंधानं संभवतीति मन्यते ग्रंथकारः आत्मानं विशुद्धचिद्रूपं त्वंपदल
क्ष्यं तुरीयमाश्रये शास्त्रार्थप्रदाभिव्यक्तमनुसंदधे अस्यात्मनस्तत्पदलक्ष्यपरमात्मना[…]खंडवाक्यार्थैक्यं घटयितुं
तत्पदार्थं शोधयति अखंडसच्चिदानंदमिति आनंदादयः प्रधानस्येति न्यायेन सत्यं ज्ञानमनंतं ब्रह्मेति श्रुत्योः
परस्परैकवाक्यतामभिप्रेत्य खंडेत्यादिभिरानंदपदस्य समासः अखंडशब्दः अनंतपदपर्यायः […] सच्चाविद्याध्य
स्तदेशकालवस्तुभ्यः परमात्मनः परिच्छेदं व्यावर्तयत्येव नञ्पदयोगात् तदुक्तं तत्त्वानंतोऽतद्वस्तुव्यावृत्त्येवाविशेष
णमिति इतराणि तु पदानि स्वार्थापरित्यागेनैव स्वविरोध्यर्थव्यावर्तनेन […]लक्षयंति तदुक्तं
ब्रह्माद्विज्ञानमानंदं १

नित्यनिवृत्तत्वात् अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति श्रुतेः नाप्यन्यगतसुखादिसाधनं ब्रह्म
अन्येषां दृष्टादृष्टसुखदुःखप्राप्तिपरिहारयोर्लौकिकवैदिकसाधनैरेव सिद्धेः तस्मान्न सुखा
दिसाधनं ब्रह्म नापि दुःखाभावरूपं भावात्मस्वभावताविरोधात् नापि सुखात्मकं तथात्वे प्रमाणा
भावादित्यत आह आनंदमिति आनंदं सुखस्वरूपं न च ब्रह्मण आनंदात्मकत्वे प्रमाणाभावः विज्ञा
नमानंदं ब्रह्म आनंदो ब्रह्मेति व्यजानात् आनंदरूपममृतं यद्विभाति को ह्येवान्यात् कः प्राण्यात् य
देष आनंदो न स्यादित्यादिश्रुतेः प्रमाणत्वात् न चानंदं ब्रह्मणो धर्म [illegible] प्रकाश[illegible] श्रु
तिस्वारस्यभंगप्रसंगात् न च ब्रह्मण ईश्वरस्य सुखित्वं परैरपीष्यते अत आनंदो विद्यते यस्मिन्नि
त्यानंदं ब्रह्मेति परेषां श्रुतिव्याख्यानमुपहासास्पदमेव न च ब्रह्मण आनंदशब्दो दुःखाभावपरः आ
नंदो ब्रह्मेति व्यजानादिति भावरूपब्रह्मसामानाधिकरण्यनिर्देशविरोधात् न च प्रियास्पर्शत्वश्रु
तिविरोधः तस्या वैषयिकप्रीतिनिषेधपरत्वादिति भावः यद्यप्यात्मपदमेवेदं शोधितपदं तथापि श्रु
त्युपरोधात्पदार्थशोधनार्थं तथाप्यत्र ब्रह्मपदमध्याहृत्य विशेष्यं बोद्धव्यं एवं सत्यखंडं सच्चिदानंदं
ब्रह्मात्मानमाश्रय इति ब्रह्मात्मपदयोः सामानाधिकरण्येन तत्त्वंपदार्थयोरैक्यं वाक्यार्थोऽब्र
ह्मत्वपारोक्ष्यनिवृ[illegible]रिप्रणीतया निरूपितः स्यान्नान्यथा एतेषां च पदानां ब्रह्मपदेन प्रत्ये
कं प्रथमसमन्वितानां [illegible] स्यात्सामानाधिकरण्येन परस्परमपि संबंधसिद्धिः अरुणया पिंगाक्ष्या
गवैकहायन्या सोमं क्रीणातीत्यत्र [illegible] पदान्वितानामरुणादिपदानामिव परस्परान्वयः

स्वार्थार्थाप्रमाणासाध्यपरिशिष्टो विशेषणमिति परिशिष्टोऽसत्यज्ञानशब्दाविलक्षणः अखं
डमपि तदनन्तं सत्यं न स्यादित्यत आह सदिति सदनन्तमनन्यत्वात्तत्त्वं बाधाभावोपलक्षित
स्वरूपमसत्तात्मकमिति यावत् ब्रह्मणोऽनन्तत्वे निरवधिकानारोपप्रसंगात् सत्यस्य ससा
क्षिकत्वे तु सर्वस्यान्यवादानुपपत्तेर् साक्षिकत्वे तु तदसिद्धेः स्वप्रकाशत्वे च ब्रह्मण एव नामांत
रत्वापत्तेर्न ब्रह्मानन्तं सत्यं चेत्यपेः अखंडं सदपि तन्न मोऽवज्ञाऽ किं न स्यादित्यत आह विदि
ति चित्तज्ञानं ज्ञप्तिरिति पर्यायः ननु ज्ञानं ब्रह्मेति सामानाधिकरण्यात् गुणत्वे तस्य तदनुपपत्तेः न
च मृत्तो घट इतिवत्तत्स्यादिति वाच्यं निर्धर्मकत्वप्रतिपादकास्थूलत्वादिश्रुतिविरोधात् किंच ज्ञा
नस्य नित्यत्वे ऽनुष्णमवत्संवित्प्रकाशवच्च ब्रह्मस्वभावानतिरेकात् अनागमापायिधर्मस्य
धर्मिणः परमार्थतोभिन्नत्वे प्रमाणाभावात् अनित्यत्वे ज्ञानानवस्थाप्रसंगात् कार्यस्य सतो ज्ञानस्या
पि कार्यांतरवत्स्वोपादानगोचरापरोक्षज्ञानजन्यत्वात् ज्ञानोपादानब्रह्मगोचरस्यापि ज्ञानस्य
कार्यत्वे तस्यापि पूर्ववत्समानयोगक्षेमतया कथं नानवस्था अजन्यत्वे प्रथमेकः प्रद्वेषः तथा च सि
द्धा ब्रह्मणो ज्ञानस्वभावता एतेन जीवात्मनोपि ज्ञानस्वभावता व्याख्याता वेदितव्या स्वप्रकाशं चेत
द्ब्रह्म तत्त्वं अप्रकाशजडविलक्षणत्वनिर्देशमात्रपर्यात् तद्देवा ज्योतिषां ज्योतिः तस्य भासा सर्वमिदं
विभातीत्यादिश्रुतेः न चैवमखंडसच्चिद्रूपमपि ब्रह्म नपेक्षावत्प्रेक्षागोचरः सुखदुःखाभावत
साधनानामनन्ततमस्य मत्वाभावात् नतावत्सुखदुःखाभावसाधनं ब्रह्म स्वस्मिन्सुखदुःखयो

एवं शास्त्रप्रतिपाद्यपरदेवतातत्त्वानुस्मरणलक्षणं मंगलं विधायेदानीं यस्य देवे परा भक्तिर्यथा देवे त
था गुरौ इत्यादिशास्त्राद्देवताभक्तिवद्गुरुभक्तेरपि विद्यांगत्वप्रतीतेर्देवमिवाचार्यमुपासीतेत्यादिस्मृ
तेश्च गुर्वाराधनोक्तिपूर्वकं स्वचिकीर्षितं प्रतिजानीते अर्थत इति श्लोकेन वेदांतो वक्ष्यमाण
लक्षणस्तस्य सारं सपिंडितार्थस्तं वक्ष्ये तत्त्वं यथामति स्वमत्यनुसारेण अनंतशाखाप्रविततस्याति
गंभीरार्थस्य वेदांतस्यावाग्बुद्धिभिरपरिच्छेद्यात् तदुक्तमभियुक्तैः गुरुचरणसरोजसन्निधानादपि
वयमस्य गुणैकलेशभाजः अपि मद्गतिजलार्णवे निमग्नाः सलिलमुपाददते मितं हि मीना इति एत
च गर्वपरिहारोक्तिवचनं न पुनर्बुद्धिभयनिमित्तं यथाशास्त्रमर्थं संग्रसादितत्यर्थः किं कृत्वा गुरूनारा

अर्थतोऽप्यद्वयानंदानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति २

वेदांतो नामोपनिषत्प्रमाणं

3 ध्यभक्तिश्रद्धातिशयस्तुतिनमस्कारादिना देवमिव पूजयित्वा गुरून् नित्ये[illegible] पूजार्थं किं
नामानो गुरव इत्यपेक्षायां स्वस्य सांप्रदायिकत्वज्ञापनाय तन्नामतो नि[illegible]ति अद्वयानंदानिति साम्नोऽपि
त्यादिवत्संज्ञामात्रत्वं व्यावर्तयति अर्थत इति अपिशब्दः शब्दार्थयोः समुच्चयार्थः न केवलं शब्दतः किंत्व
र्थतोपीति तत्र हेतुः अतीतद्वैतभानत इति अतीतं द्वैतं यस्मात्तदतीतद्वैतं प्रत्यगात्मतत्त्वं तस्य भानं सा
क्षात्कारस्तस्मादतीतद्वैतभानतः अतीतद्वैतभावत इति पाठे तत्त्वज्ञानविध्वस्तनिखिलभेदब्रह्मात्म

वे॰ टी॰

नचैकार्थत्वेसत्यादिपदानां पर्यायतापत्तिरयौगपद्यं चेतिवाच्यं प्रवृत्तिनिमित्तभेदात्पर्यायत्व
भेदात्कार्यत्वदोषानवतारात एवमन्योपिवाक्यविचारोयथायोगं न्यायप्रदर्शनीयो विस्तरभियानेह
लिख्यते एवं विधिमुखेन परिच्छिन्नानृतजडदुःखरूपानात्मतद्धर्मविलक्षणं ब्रह्मेतिनिरूप्ये
दानींनेतिनेत्यस्थूलं यतोवाचोनिवर्त्तंते अप्राप्यमनसासहेत्यादिश्रुतिमाश्रित्यनिषेधमुखे
नसकलनिषेधावधिभूतं सत्यस्य सत्यं ब्रह्मेतिदर्शयत्यवाङ्मनसगोचरमितिवाक्‌च मन
श्च वाङ्मनसे तयोर्गोचरो वाङ्मनसगोचरो न वाङ्मनसगोचरो अवाङ्मनसगोचरस्तदितिविग्र
हः नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा अस्तीत्येवोपलब्धव्यस्तत्वभावेन च काठकश्रुतेः एवंवि
धिनिषेधाभ्यां ब्रह्मणः स्वरूपलक्षणमभिधाय लक्षितं स्वरूपं तटस्थलक्षणेन संभावयति
अखिलाधारमिति अखिलस्याकाशादिप्रपंचस्याधारमाश्रयस्तदितिविग्रहः आश्रयशब्दः स
त्त्विप्रलययोरप्युपलक्षणार्थः तथाचश्रुतिः यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्र
म्रियंते यंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति ततश्च जगदुत्पत्तिस्थितिलयकारणं ब्रह्मेत्युक्तं
भवति अत इदं फलितं सत्यज्ञानानंतानंदैकरसं ब्रह्म तत्पदलक्ष्यमिति आत्मपदादेवत्वंपदार्थ
सुद्धिः आत्मेत्येवोपासीतात्र ह्येते सर्वे एकीभवंतीतिश्रुतावात्मपदस्य निर्विशेषप्रत्यक्चैत
न्यमात्रनियतत्वावधारितत्वात् तमाच्छे तत्त्वमसिपदयोः सामानाधिकरण्यादैक्यवाक्यार्थसिद्धिरित्युक्तं तदेवं
वाक्यार्थभूतमात्मानमाश्रयेदिति सपूर्णमभीष्टसिद्धये अभीष्टं वाक्यार्थाप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्तिनिरासलक्षणं यथाशास्त्र

मर्थसंग्रहस्सामर्थ्यत्तद्दणं च तस्यसिद्धिः संपत्तिस्तस्यैतदर्थमित्यर्थ॥

मनुना१

नियचशरीरकसूत्रप्राणि नपासास्मत्पदीनि वेदांतापैसंग्रहवाक्यानि आदिशब्दो भाष्यादिसंग्रहा
र्थः चशब्दो वेदांतशब्दानुषंगार्थः तथाच वेदान्तमानतोऽवसानभागो वेदांत इति व्युत्पत्तियोगान्मुख्यो वे
दांतशब्दो वेदशिरोभागेऽन्तरभेदेषु शारीरकादौ तूपचरित इति व्युत्पादितः ननु किं पुनरस्य ग्रंथस्यारंभे
निमित्तं न खलु निर्निमित्ता प्रेक्षावतां प्रवृत्तिरिति चेत् कोऽभावः निमित्तमात्राक्षेप इति चेत् न अश
नायाद्यनेकोर्मिमालाकुलसमुद्भूतदौर्भाग्यहतविवेकज्ञानपापमिदृढतरकामक्रोधाद्युत्तुंगशैलजा
लविषमे सुतदुहितृकलत्रबांधवाद्यनेकमकरनक्रचक्राकुलेन रमनगपशुपक्षिदेवादिस्थानभो
गफेनबुद्बुदे संसारसागरे अनवरतमधऊर्ध्वंतिर्यग्वा मज्जनोद्विविवशानतितततगंभीराद्यनेक ग ५३-१

५ अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैः तद्वत्तासिद्धेर्नते पृथग्गणनीया इत्याह ॥

शाखा वेदांतविचारमसाधुमावलंबनामसमर्थान् दुःखिनो लोकानालोक्य [illegible] करुणा यानिमित्त
तत्वोपपत्तेः अपनिमित्तविशेषादेपक्षेत्तत्राह अस्येति शास्त्रे [illegible] शास्त्रमौतरेस्थि
त आह प्रकरणं नाम ग्रंथभेदं विपश्चित इति द्विप्रकरणलक्षणं [illegible] तपान्यपुच्छ्यादिशेषकं [illegible] संबद्ध
मत्प्रकरणं तत्त्वज्ञानोपि ये रेवानुबंधैरनुबंधवद्युक्तं अन्यपाशास्त्रप्रकरणमभिन्नविषयादिम
त्वेन शास्त्रीयं तं बहुलप्रसंगादसंबद्धप्रलपितमिदमापद्येत अतोऽस्य ग्रंथस्य वेदांतशास्त्रीयप्रकरणत्वा
द्वेदांतशास्त्रसिद्धैरेवानुबंधैस्तद्वत्तासिद्धेर्नतेनुबंधाः पृथग्गणनीया इत्यर्थः ननु महाविषयादेरि
ह शास्त्रीयत्वेप्यवांतरविषयादेः पृथग्गणनमुचितं स्तरपाशास्त्रं परित्यज्य प्रेक्षावतोऽत्र प्रवृ

ब्रह्मात्मप्रतिपत्तिपरेषु मुक्तिसूत्रेषु विद्वन्निर्मितनिबंधेषु चाविशेषेण वेदांतशब्दस्य लोके प्रयोगदर्शना
त्तत्र मुख्यवृत्तितः प्रतीतिं वारयन्मुख्यगौणभेदेन वेदांतशब्दं व्युत्पादयति वेदांतो नामेत्यादिना उपनि
षच्छब्दो ब्रह्मात्मैक्यसाक्षात्कारविषयः उपनिपूर्वस्य क्विप्प्रत्ययांतस्य षद्लृ विशरणगत्यवसादनेष्वि
त्यस्य धातो रूपं निषदिति रूपं तत्रोपशब्दः सामीप्यमाचष्टे तच्च संकोचकाभावात् सर्वांतरे प्रत्यगात्मनि
पर्यवस्यति निशब्दो निश्चयवचनः सोपि तत्त्वमेव निश्चिनोति तन्निश्चयवाच्युपशब्दसामानाधिक
रण्यात् तस्मात् ब्रह्मविद्यास्वसंशीलिनां संसारसारतामतिं सादयति विशादयति शिथिलयतीति वा परम
श्रेयोरूपं प्रत्यगात्मानं सादयति गमयतीति वा दुःखजन्मप्रवृत्त्यादिमूलाज्ञानं सादयत्युन्मूलयतीति वा

तदुपकारीणि शारीरकसूत्रादीनि च॥

पनिषत्पदवाच्या सैव प्रमाणं तस्याः प्रमासूपायाः करणमतः सर्वशाखासूत्तमांगेषु पठ्यमानो ग्रंथ
राशिरप्युपचारात्प्रमाणमित्युच्यते तथा चोपनिषदः प्रमाणं प्रमाकरणमुपनिषत्प्रमाणं वेदांत इत्य
र्थः।तदुपकारीणि वेदांतार्थविचारानुकूलानीति यावत् तदनुकूलत्वं वेदांतवाक्यप्रमेयासंभावनापोह
द्वारा न तु प्रमित्युत्पत्तौ तत्फले वा साक्षाद्विचारणा स्वसांगभावः तथा हि वेदांतवाक्यानां सापेक्षताप्र
संगात् तदुक्तमभियुक्तैः स्वाध्यायवत्त्र करणं घटते विचारो नाप्यंगमस्य परमात्मधियः प्रसूतौ सापे
क्षतापततीति वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमितिजन्मनि तत्र युक्तमिति शारीरमेव शारीरकं तत्र भवो जी
वः शारीरकः सत्सूच्यते याथात्म्येन निरूप्यते यैस्तानि शारीरकसूत्राणि अथातो ब्रह्मजिज्ञासेत्यादिका

र्यंतो ऽथवः प्रमातेत्यविवक्षितः जीवमात्रं स्वपदेन समं संभवेन शास्त्रार्थप्रतिपत्त्यायोगात्। तस्य तु
शावकस्य चित्तविशिष्टसाध्यसाधनचतुष्टयसंपन्नस्येति वक्ष्यमाणसाधनचतुष्टयविशिष्टस्य त्वर्थः अ
यं भावः न तावद्वेदाध्ययनं ब्रह्मजिज्ञासाधिकारहेतुः तस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वात्तन्मा
त्रेणोदक्त नियमेन प्रवृत्त्यनुपपत्तेः नापिधर्मविचारः प्रागपिधर्मविचारादधीतवेदांतस्य ब्र
ह्मजिज्ञासोपपत्तेः नापिधर्मानुष्ठानं सिद्धजिज्ञासाहेतुः विनापिधर्मानुष्ठानं ब्रह्मचर्यादेव वि
रक्तस्य ब्रह्मजिज्ञासादर्शनात् श्रुतिश्च भवति विविदिषोः संन्यासविधायिनी यदि वेतरथा ब्रह्म
व चर्यादेव प्रव्रजेदित्यादिका ननु जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषि
भ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी ... वासीति श्रुतेः ऋ
णानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेवमानः ... धः इति स्मृतेश्च ऋ
णत्रयापाकरणमंतरेण मोक्षशास्त्रविचारप्रवृत्त्ययुक्तता यागस्य सा ... अथशब्देनानुष्ठाय सं
न्यासपूर्वकविचारप्रवृत्तिरिति चेत् उच्यते श्रुतिस्तावत् इदं ... वद्यता यजि ... याश्र
यवदानमिति पश्ववदानत्रयविधिमुपक्रम्य तदवदानैरेवावदयेत तदवदानानामवदानत्वमित्यव
दाननिर्वचनेनोपसंहारादवदानत्रयविध्यर्थवादत्वान्न स्वार्थपरा अतः सा ब्रह्मचर्यादेवेति श्रुत्या अ
नन्यपरयावाध्यते यदि ब्रह्मचर्यादिभिरपाकरणीयं ऋणत्रयमस्यावदानैरेवावदयेतेत्यवदानश्रुतौ

ब्रह्मचर्यादेव ॥

त्ययोगादिति चेत् वाढं प्रकरणत्वेनैवावांतरसंगतेः सुल[illegible]त्वात् पृथगनिर्देशानपेक्ष
णात् तथाहि सारग्रहणेन कुत्र वांतराधिकारीसगुणनिर्गुणरूपविषयभेदं परित्यज्य निर्गुणसार
मात्रमिह विषयः तन्मात्रावधारणं अवांतरप्रयोजनं संबंधोपि विषयानुरूप इति भावः ॥ ननु
शास्त्रीयानुबंधः शास्त्रविद्भिरेव विज्ञायते न व्युत्पित्सुभिस्तत्कथं [illegible] शास्त्रीयविज्ञा[illegible]
भिज्ञानाप्रवृत्तिरित्याशंक्य शास्त्रीयमेवानुबंधं संक्षेपतो व्युत्पादयितुमुपक्रमते तत्रानुबंधो नामेत्यादिना
तत्र वेदांतशास्त्रे स्वार्थप्रतिपत्तारमनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगादादावधिकारिणं [illegible] तस्यैव

तत्रानुबंधो नामाधिकारिविषयसंबंधप्रयोजनानि अधिकारी तु विधिवदधीतवेदवे
दांगत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जन
पुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांत
निर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाता ॥

विषयबोधमंतरेण प्रवृत्तेर्विषयस्य तदानंतर्यं विषयस्य च शास्त्रप्रतिपाद्यत्वसिद्धये संबंधस्य
विषयानंतर्यं प्रयोजनस्य चरमत्वं प्रसिद्धमित्युद्देशपाठक्रमो विवक्षितः तथा च शारीरकसूत्रं
अथातो ब्रह्मजिज्ञासेति तत्र प्रथमोद्देशक्रमेणाधिकारिणं निरूपयति अधिकारी तु इति धर्मजिज्ञा
साधिकारिणस्य चैतदपेक्षया [illegible] प्रमाताधिकारीत्यन्वयः लौकिकवैदिकव्यवसाय

रौ

तिं तात गच्छतीत्यादिस्मृतेर्जन्मांतरानुष्ठितस्यापि जन्मांतरोपकारकत्वसंभवादिति भावः एवं काम्यनि
षिद्धवर्जनपुरःसरमिह जन्मनि जन्मांतरे वानुष्ठितनित्यादिदीपितकल्मषस्य विवेकादिसाधनचतु
ष्टयसंपत्तौ कारणमाह आपाततः इति आपाततो विचारेणादर्पणीवधारणमंतरेणाधिगतोऽखिलो
वेदार्थो येन स तथा वेदशब्दो वेदांतविषयः वेदार्थज्ञाने हेतुमाह विधिवदिति वास्तव्येन षडंगो वे
दो निष्कारणो ध्येयो ज्ञेय इत्येवं वचनान्नित्याध्ययनविध्युपलापितवेदान्तवचोभिर्निरुक्तव्याकरणाद्यु
पकरणैरनवबुद्धतात्पर्यैर्लिंगैरधिगताखिलवेदांतार्थ इत्यर्थः एतदुक्तं भवति वस्तुतश्चित्सदानं
दब्रह्मस्वभावोप्यात्मानाद्यनिर्वाच्याविद्यामेवावलम्ब्य जीवभावोऽविद्याकामकर्मवशं गतः का
म्यनिषिद्धाचरणतस्माच्चरंस्तत्फलभूतस्वर्गनरकौ भुंजानस्तद्भोगवासनाबा[illegible]दनुरूपं पुनः क
र्म पुनः फलमित्येवं घटीयंत्रवत् कुलालचक्रवत् चोर्ध्वाधस्तिर्यक् भ्रमण[illegible]नुभवन् हृदयः कृ
तार्थो मरोऽहं दुःखी त्यात्मानं मन्यते एकः काम्यपुरो नित्यस्तत्यान्नै[illegible]ः परः प्राधान्येन फलं
मुद्दिश्यापिकीकाम्यकर्मणः प्राधान्येन मनःशुद्धिर्नित्यस्य फल[illegible]वलं प्रत्यवायस्य निवृत्ति
रितरस्य त्वित्यादिपुराणवचनादतीतानेकजन्मसुकृततया हृच्छि[illegible]पुंजपरिपाकोदयवशात्का
म्यफलेषु जातदोषबुद्धिराध्यात्मिकादिदुःखत्रयं च निषिद्धाचरणफलमाकलयन् काम्यनि
षिद्धे परित्यज्य नित्येश्वरार्पणबुद्ध्यानुष्ठितनित्यादिदीपितकल्मषमलयानि मलस्वांतोऽधीतसांगवे
दार्थापाततालोचनपालब्धविवेकादिसाधनसंपन्नः स्वात्मयाथात्म्यजिज्ञासुर्वेदांताधिकारीति ॥

करणहेतुत्ववचनं स्वाध्यपरमेवेति मतं तथापि जातमात्रस्य ऋणत्रयसंबंधे प्रमाणाभावादधिकारी जायमा
नो गृहस्थो वा जायमानो इति वा व्याख्यानमुचितं स्मृतिस्वारस्यात् किंच त्रयमलमपाकृत्येत्याणा तेन यज्ञायुधी
यजमानः जरया वा ह्येवास्मान्मुच्येरन् वीरहा वा एष देवानां योऽग्निमुद्वासयते इत्यादिश्रुतयः। ऐकाश्रम्यं त्वा
चार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येत्यादिस्मृतयश्च व्याख्याता वेदितव्याः [illegible] चर्यादेव प्रव्रजेत् यदह
रेव विरजेत् तदहरेव प्रव्रजेत् अथ पुनरव्रती वा व्रती वा किमर्था वय[illegible]महे किमर्था वयं यक्ष्या
महे किं प्रजया करिष्यामः येषां नोऽयमात्मेति याज्ञवल्क्यः प्रव्राजं ये प्रजाम[illegible]ते स्मशानानि भेजिरे
ये प्रजां नेषिरे ते मृतत्वं हि भेजिरे इत्यादिश्रुतिस्मृत्यविरोधात् तस्मान्न धर्मानु[illegible]नं ब्रह्मजिज्ञासाहे
तुः अतो ब्रह्मजिज्ञासा जायमाना यस्मिन्सत्यवनियमेन जायते यस्मिन्नसति नैव [illegible]यते तदेव तस्याः सा
धनमेषितव्यं तच्च वक्ष्यमाणं साधनचतुष्टयमेवेति कस्मात्पुनः साधनसंपन्नस्यत्राह नितान्तेति नि
तान्तमत्यन्तं निर्मलं मुमुक्षुः स्वान्तमन्तःकरणं यस्य स तथा कुतः स्वान्तस्य नैर्मल्यं प्रतिबंधकरागादिवास
नानिवृत्त्येत्याह निर्गतेति रागादिवासनारूपकल्मषनिवृत्तिरपि कुतस्तत्राह नित्येति काम्यकर्म
भिरतस्यानुष्ठीयमानमपि नित्यादि न साक्षात्कल्मषनिवृत्तिहेतुः कामवासनया मुमुक्षुप्रतिबंध
संभवात् तथा निषिद्धवर्जने पापेन प्रतिबंधादित्यभिप्रेत्य नित्याद्यनुष्ठानं विशिनष्टि काम्यनि
षिद्धवर्जनपुरःसरमिति एवं नित्याद्यनुष्ठानस्य मुमुक्षुत्वैकभविकत्वनियमं व्यावर्त्तयति अ
स्मिन्नजन्मनि जन्मान्तरे वेत्यनेकजन्मसंसिद्धस्ततो याति परां गतिं न हि कल्याणकृत्कश्चिद्दुर्ग

सिद्धेरिति चेन्न। नैयायिकानामकरणस्य स्वरूपेण प्रत्यवायजनकत्वं

त्तिकानुष्ठानमसंभविष्यत् तदासंचितदुरितक्षयोऽभविष्यत् न चायं विहितमकार्षीदतः प्रत्यवायीभ
विष्यतीति तथा च विचिकित्सन्नः प्रायश्चित्तीयते इति वचनं तु प्रत्यवायस्यान्यथाप्युपपत्तेर्न तद्बलादभावस्य
हेतुत्वाशंकाप्युक्ता तदुक्तं नित्यानामक्रिया यस्मात् सर्वेषां पित्वेति सत्त्वतः प्रत्यवायक्रियं तस्मात् सर्वदार्थे
शतामवेतद् इति ननु हेत्वपेयपि शतुर्विधानस्य तुल्यत्वे कथं तदकरणार्थत्वगम इति चेन्न अभावात् भा
वोत्पत्तेरनुपपत्तेरिति वदामः भावरूपस्य हि कार्यस्य भावरूपं कारण[illegible]यज्ञादिभिरवधारितं ते
न शतप्रत्यवायेऽभावस्याभावहेतुताभ्युपगमो विरुध्यते नन्वेवं सति कथं[illegible]करणस्य प्रत्यवायलद
कत्वं सिध्यते किन्तु तद्ज्ञानस्य न च तस्यैव प्रत्यवायजनकत्वमपीति वा[illegible]करणज्ञाने प्रत्य
वायाभावप्रसंगात् ननु कथं तर्हि भावे हेतुरनुपलंभस्याभावप्रमितिहेतुत्वं सिध्यते[illegible]के स्वप्रतिबं
धकाभावस्य तत्र प्रागभावस्य च कारणत्वं सिध्यते इति चेन्न भ्रान्त्येति ब्रूमः तथा हि न तावद्योग्यानुप
लब्धेः स्वरूपसत्तामात्रेणाभावप्रमितिहेतुता युक्ता तथा सत्यज्ञातकरणकत्वेनाभावज्ञानस्य प्रत्य
क्षत्वप्रसंगात् ज्ञाताया एवानुपलब्धेरभावप्रमाहेतुत्वे तज्ज्ञानस्यैव भावरूपस्याभावज्ञानकार
णता वक्तव्या स्यादिति प्रतिबंधकाभावः कारणमिति पक्षेऽपि किं दृष्टकारणकलापकुक्षौ निक्षिप्यः
किं वा दृष्टकारणकलापकुक्षौ आद्ये दाहादिकार्यार्थिनः काष्ठादिसमवधानाधिगमवत्प्रतिबं
धकाभावसमधिगमे मंत्र्येव वह्निप्रज्वलनादौ प्रवृत्तिः स्यात् न च तथा प्रवर्त्तमानो दृश्यते अन्त्य
या सत्यपि प्रतिबंधके समवधाने तदभावनिश्चये न प्रवर्त्तमानस्य कदाचित्कार्यानुदयो न भवेत्

कामादिपदार्थानुक्रमयति । काम्यानीत्यादिना फलोद्देशेन विधीयमानानि कर्माणि काम्यानि । न
च वि[illegible]स्वर्जितापूर्तेन आदावव्याप्तिः तत्रापि सम्बन्धः स्यात् सर्वोन्नपत्यवशिष्टत्वादिति न्यायेन स्व
र्गफलोद्देशेन विधेः साधितत्वात् ज्योतिष्टोमग्रहणं ऐकाहिकविषयः स्यादिशब्देनाहीनसत्रसंग्र
हार्थः । स्वर्गमात्रगतेष्टसाधनतानिषेधकनञ्पदयोगिवाक्यगम्यानि निषिद्धानि लिङाद्यनुषक्त
नञ्योगिवाक्यगम्यानि वा नरकादीत्यादिपदार्थेऽहिकदुःखग्रहः ब्राह्मणहननादीत्यादिपदा
त्सुरापानादिग्रहः प्रत्यवायशब्देनाऽऽगामिदुःखमुच्यते येषामकरणे विज्ञायमाने तत्साध्यते

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषिद्धानि नरकाद्यनिष्टसाधनानि
ब्राह्मणहननादीनि नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ॥

साध्यते तानि नित्यानीत्यर्थः । अकरणे प्रत्यवायसाधनानि नित्यानीति [illegible] निमित्तमुपात्त
दुरितक्षयार्थानि नित्यानीति नित्यकर्मलक्षणं न त्वकरणे प्रत्यवाय[illegible]कानि नित्यानीति
न त्वकुर्वन्विहितं कर्म निन्दितं च समाचरन् प्रसजंश्चेन्द्रियार्थेषु [illegible]रः पतनमृच्छतीति
स्मृतौ शातृप्रत्ययादकरणस्य प्रत्यवायहेतुत्वमवगम्यते तत्कथमकरणस्य प्रत्यवायानुत्पादक
त्वमिति चेल्लक्षणहेत्वोः क्रियायाः इति पाणिनिना शतृलक्षणार्थे विधानात् अत एव नित्या
द्यनुष्ठानकालेनिद्रालस्यादिपरवशो नरमालोक्य शिक्षेत स्यते [illegible] नित्यनैमि

प्रायत्वात्तस्मान्नाभावाद्दोषोत्पत्तौ हेत्वंतः तं तु नाश्यत्वेन नाश इत्यपि स्वप्रक्रियामात्रमित्यास्तां विस्तरः
अस्तु वा कथंचिदभावस्यापि कारणत्वं तथापि न प्रत्यवायस्याकरणाद्धेतुकत्वं प्रत्यवायशब्दवाच्यस्य पा
पादृष्टस्य तज्जन्यागामिदुःखस्य वा निषिद्धक्रियाजन्यत्वात् पापकारी पापो भवति अपयपइदक
पयवरणा अभ्यासो दयतेकस्मयं पापोनिमापद्येरन् इति च स्मृतेः तस्मादकरणे प्रत्यवायसाधना
नि प्रत्यवायज्ञापकानि निमित्तानीति व्याख्यानं सुव्याख्यानमिति संध्यावंदनादीनीत्यादिपदात्पं
चमहायज्ञादिग्रहः ॥ निमित्तमात्रमासाद्यावश्यकर्तव्यतया विहितानि नैमित्तिकानि एतदाह

नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि
प्रायश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि ॥

8 पुत्रेति जाते ... नाम वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति विहिता आदिपदाद्यसादृता
न्नेष्टि ... नन्दहत्यग्निरग्न पवमानं ... भवते पुरोडाशमष्टाकपालं निर्वपेदित्यादिनोक्तानां ... भवत्यादीनां
ग्रहः उपरागस्नानादेः च स्मार्त्तमुदाहरणीयं यद्यपि जाते ... यस्मिन् जात एतामिष्टिं
निर्वपति स पूत एव तेजस्व्यन्नाद इंद्रियावी पशुमान् भवतीति पुत्रगाम्यवांतरफलश्रवणान्नवद्य
मानकर्त्तृगामि द्विविधफलानुकूलं जातेष्ट्युदाहरणं तथापि नैमित्तिकस्वरूपमात्रव्युत्पादना
योदाहरणं न दुष्यतीति द्रष्टव्यं विहिताकरणप्रतिषिद्धसेवारूपनिमित्तविशेषानुबंधीनि प्राय

प्रति

ननु सति योगिनि तदभावनिश्चयो न स्मरति चेत् तर्हि प्रतिबंधकस्यायोग्यत्वेन तदभावोप्ययोग्य एवेति
न तस्य दृष्टकारणकलापकुक्षिनिक्षेपः नापि द्वितीयः अस्मदाद्यप्रत्यक्षाणामीश्वरतज्ज्ञानेच्छाप्रयत्नप्रा
गदृष्टानां देशकालयोश्च सम्पादितस्य चारक्रियायाश्च भावरूपतया प्रतिबंधकाभावत्वायोगात् तद
तिरिक्तस्य कस्यचित् सर्वकार्यसाधारणकारणस्य कल्पकाभावात् किंच सत्यपि प्रतिबंधके उत्तेजक
समवधाने कार्यदर्शनात् न प्रतिबंधकाभावस्य कारणता उत्तेजकाभावविशिष्टप्रतिबंधकाभावस्य
कारणत्वे तादृक् प्रतिबंधकाज्ञाने तदभावाग्रहात् तस्य कार[illegible] तत्त्वानन्यथासिद्धनियत
पूर्ववर्तित्वमपि प्रतिबंधकाभावस्य तदन्वयव्यतिरेकयोर्विरोधि[illegible]संसर्गाभावाविषयतयान्यथासि
द्धत्वात् तर्हि विरोधिसंसर्गाभावत्वेनैव कारणतेति चेन्न सत्येवोत्पत्तिहेतुकलापसमवधाने स्थितिहे
तुसमवधाने चोत्पत्तेः स्थितेर्वा विघटकभावस्य विरोधित्वप्रसिद्धेर्न तदभावस्य तामसत्वतभोवावि
रोधिसंसर्गाभावस्य तत्र वैशेष्यतन्त्र इति योगिनो विरोधित्वसिद्धेः तस्मिंश्च सति तत्संसर्गाभावस्य साम
ग्रीप्रवेशः स्यान्योन्याश्रयस्य दुरुद्धारत्वादित्यलमतिकर्दमेन प्रागभावस्यापि नियतप्राक्कालवर्ति
त्वेन कारणत्वे भावविशेषणस्य कालस्यात्माश्रयताप्रसंगः न च प्रागभावत्वेनैव कारणत्वं ता
वन्मात्रे कारणलक्षणाभावात् किंच कारणत्वं नाम धर्मो भावात्मक उताभयपापि नाभावनिष्ठ
त्वं तस्य संभवति विरोधिनोभावाभावयोराधाराधेयभावानुपपत्तेः अभावस्य निर्विशेषत्वान्निरति

भावात्मकउ २

कर्मानुष्ठानात् धर्मोत्पत्तिः धर्मोत्पत्तेः पापहानिस्ततश्चित्तशुद्धिस्ततः संसारात्म्ययाथात्म्यावबोधस्त
तो वैराग्यं ततो मुमुक्षुत्वं ततस्तदुपायपर्येषणं ततः सर्वकर्मसंन्यासस्ततो योगाभ्यासः ततश्चित्तस्य प्र
त्यक्प्रवणता ततस्तत्त्वमस्यादिवाक्यार्थपरिज्ञानं ततो विद्योच्छेदस्ततः स्वात्मन्यवस्थानमिति॥ उपा
सनानां त्विति तु शब्दः कर्मभ्य उपासनानां वैशिष्ट्यद्योतनार्थः तथा नित्याद्यनुष्ठानदीपितकल्मषत्
याविशुद्धस्य चित्तस्य शास्त्रप्रकाशितध्येयेष्वेयवाविषये एकाग्र्यं निश्चलत्वमित्यर्थः। सद्रूपा
वधारणक्षमत्वमिति यावत् पूर्वोक्तप्रकारेणानुष्ठीयमानानां नित्यादीनामुपात्तदुरितक्षयद्वा
राशुद्ध्यादिपरंपरया ज्ञानहेतुत्वे प्रमाणमाह विविदिषंतीति श्रुतिरिति आदिपदात् यज्ञेनानाशकेनेति वाक्यपरि

१ उपासनानां तु चित्तैकाग्र्यं तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेनेत्यादिश्रुतेः॥॥

यद्यपि विविदिषंतीति विविदिषायां वेदविधिप्रत्ययोनुसंधेयः ... सनादियज्ञादीनां विविदिषा
संयोगः प्रवेशप्राप्तेनानुवादकत्वं वाक्यस्य कल्प्येत ननु यज्ञादीनां ... वाक्येनावरुद्धत्वात् कर्त
व्यतयाप्राप्तानां विविदिषार्थत्वे नित्यानित्यसंयोगः प्रसज्येत यदि नाविविदिषार्थत्वं ... नुष्ठानमप
रनिष्येत ततः संसारव्याविवृत्तये नाधिरनुष्ठानस्यादिति ... रादिवत्संयोगपृथक्त्वन्यायेनः राम २
न तु तद्धिते नैव न्यायेन कर्मणां मोक्षार्थत्वमपीति राकर्णीयं ज्ञानकर्मसमुच्चयनिराकरणात्
संयोगपृथक्त्वन्यायेनेति। एकस्य तु भयत्वे संयोगपृथक्त्वमिति जैमिनिसूत्रं एकस्योभयार्थत्वे विनियोजकप्रमाणस्य पृथक्त्व ... तीति
मुभयत्वनियामकमिति ... खादिरं वीर्यकामस्य ... कुर्वीतेति
वाक्याभ्यां तथा बोधितत्वात् तथा तु क्रतोः फलांतरसमृद्धं बोध ... वाक्याभ्यामुपपद्यतेत्यर्थः २

च्छिन्नातिपापक्षयमात्रोद्देशेन विहितानीति वा आदिपदात्स्वाध्यायादिग्रहः। शास्त्रबोधितेषु सगुणेषु
स्मरणे दीर्घकालादरनैरंतर्येणोपेतमनोवृत्तिस्थिरीकरणात्मकान्युपासनानि उपासनानां ज्ञानाद्भे
दं दर्शयति मानसव्यापाररूपाणीति निदिध्यासनाद्भेदमाह सगुणेति शांडिल्यविद्यादीनाम् सर्वं ख
ल्विदं ब्रह्मेत्युपक्रम्य स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप इत्यादिना छांदोग्ये विहिता वाजि
नामग्निरहस्येपि कांडे स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्यादावुक्ता बृहदारण्यके
च मनोमयोयं पुरुषो भाः सत्य इत्यादौ प्रत्यभिज्ञाता विद्या आदिशब्दाद्दहरवैश्वानरादि विद्यांतरग्रहः

उपासनानि सगुणब्रह्मविषयकाणि मानसव्यापाररूपाणि शां
डिल्यविद्यादीनि एतेषां नित्यादीनां बुद्धिशुद्धिः परमं प्रयोजनं॥

इदानीमुक्तलक्षणानां नित्यादीनामीश्वरार्पणलक्षणानुष्ठीयमानानां परमफलं दर्शयति एतेषामिति
आदिपदान्नैमित्तिकप्रायश्चित्तयोर्ग्रहः। नित्यादीनामुपात्तदुरितक्षयद्वारा बुद्धिशुद्धिहेतुत्वमिति द्रष्ट
व्यं निर्गतनिखिलकल्मषतया त्वं तेषां तत्नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमित्यादिस्मृतेः। ध
र्मेण पापमपनुदतीति श्रुतेश्च चित्तशुद्धेः परमप्रयोजनत्वं परंपरया मोक्षसाधनत्वात् तथा च स्मृतिः
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु इत्युपक्रम्यासक्त
बुद्धिः सर्वत्र जितात्मा विगतस्पृहः। नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छतीति तदुक्तं नैष्कर्म्ये

त्तिकरूपं कर्म काम्यं वा इति आद्ये कल्पे न नित्यादेः पितृलोकः फलं द्वितीये त्वस्य विध्युद्देश्यफलेन
वनिराकांक्षत्वात् पितृलोकफलसंबंधाभावात् नापि विनापि ध्यानं धर्मेतं आश्रमधर्ममात्रेणो
त्तरमार्गगमनं भवति। विद्यया तदारोहंति यत्र कामाः परागताः न तत्र दक्षिणा यांति नाविद्वांसस्तप
स्विन इति श्रुतौ विद्याविरहिणामुत्तरमार्गनिषेधात्। निर्णीतं चैतत् ... पादे अनि
यमः सर्वेषामविरोधः शब्दानुमानाभ्यामित्यधिकरणे श्रुतिना पुनरावृत्तिर्न ... तस्मान्नावृत्ते
किंतु गमनमात्रं श्रुतौ तु देवलोकशब्दितब्रह्मलोकगतानां पुनरावृत्त्यभावो ... तेषां नेन प्रति
प पद्यमाना इमं मानवमावर्तं नावर्तंते इति तेषामिह न पुनरावृत्तिरिति चायं तु ... इति च
ग विशेषणात् कल्पांतरे आवृत्तिरवगम्यते तद्विद्याविरहितानां। अनावृत्तिस्तु विद्या... क्रममुक्त्या
ज्ञानादिति रहस्यं। नन्वेवं सति को दोषः भाष्यविरोधः तत्र हि मरुतामरंभेणा ये चेमे रण्ये श्र
10 द्धा तप इत्युपासते इति पंचाग्निविद्यागतवाक्यव्याख्यानावसरे गृहस्थानां विद्यारहिताना
मप्यत्र तपः श्रुत्यभावाद्भावाद्ब्रह्मचर्यादिभिरसत्वान्न स्वधर्मनिष्ठतामात्रेणोत्तरमार्गगतिर
स्ति। इतरेषां नैष्ठिकवानप्रस्थमुख्यसंन्यासिनां तु तद्विपरीतत्वात् तत्तदाश्रमधर्मनि
ष्ठामात्रेणोत्तरमार्गगतिरपुनरावृत्तिलक्षणा भवेदित्याचार्यैरेवं निरूपितं न तत्र दक्षिणा
इत्यादिश्रुतिः परमसुखमपेक्षितेति च व्याख्यानं ततः कृतम् एवं विभागवचनं इति चेत् सत्यं। ऊर्ध्व
रेतसामुत्तरमार्गेण ब्रह्मलोकगमनं ... इति तात्पर्यं ... न पुनरावृत्तिर्न पुनरा

तथा च न्यायेऽलब्ध [illegible] नपेक्षितं क [illegible] तदुपकारकत्वं च स्यात् सर्वापे
क्षा च यज्ञादिश्रुतेरश्ववदिति न्यायात् उक्तं च भाष्यकृद्भिः विविदिषासंयोगात्तु वा स्यतरा(णि)
यज्ञादीनीति ॥ तत्रैव स्मृतिं संवादयति तपसेति आदिपदात्कषायपक्तिः कर्माणीत्यादि स्मृत्यं
तरग्रहः ननु नित्यादेः सत्वशुद्धि तद्द्वारा ज्ञानफलकत्वे कर्मणा पितृलोको विद्यया देवलोकः
सर्व एते पुण्यलोका भवंतीति श्रुतिर्नित्यादीनां पितृलोकादिफलप्रापी(प्ये)तेति भ्रमस्यादत आह। नि
त्यनैमित्तिकयोरिति। अत्र पापक्षयो ज्ञानद्वारेण तस्यावांतरफलाभावात्। न सुपात्त दुरितक्षय
मंतरेण तस्य किंचित्फलं श्रुतमस्ति। अनयोस्तु [illegible] पतत्विति विशेषः नित्यनैमित्तिकयोः
तपसा कल्मषं हंति विद्ययामृतमश्नुते इत्यादि स्मृतेश्च। नित्यनैमित्तिकयो [illegible] नानां चा
वांतरफलपितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक [illegible] त्।
पितृलोकप्राप्तिरवांतरफलं। उपासनानां सत्यलोकप्राप्तिरिति विवेकः। [illegible] फल [illegible] निर्मिते
छायागंधर्व [illegible] ति स्मृत्युक्तछायागंधर्ववत् पितृ [illegible] कादिफल [illegible] वांतर [illegible] गिक
त्वं तद्दृष्टेन नित्यादेरविधानात्। विविदिषासंयोगस्य [illegible] सत्यफल [illegible] मिति
भावः। ननु पितृलोकस्य कर्मनित्यादि साध्यत्वं श्रुत्यादि [illegible] देवलोकस्यैव श्रुत्या
शीतिमहत्स्याणां मुनीनामसूर्यरेतसां उत्तरेण पंथमानाः [illegible] काम [illegible] रेतसां अ
त्रमधर्मसाचे साध्यत्वावगमात्कुतो विद्याफलत्वमिति [illegible] किं स्मार्तादिनित्य [illegible]

कर्मविशेषाकांक्षित्वान्मन्त्रार्थदस्थैर्य[illegible]पुण्यचितो लोक इति श्रुतिरुपपद्यते काम्य
प प्रोक्षित्वयोः फलविशेषोद्देशेन पापक्षयमात्रार्थत्वेन च विधानात्। फलान्तराकांक्षाभावात् त
पांगाववबद्धानामुपासनानां कर्मसमुच्चयत्वादनंगावबद्धानामपि प्रतीकोपासनानामत्र ब्रह्मोपा
सनानां चाभ्युदयफलत्वात्कार्यकारणब्रह्मोपासनानामवान्तरफलं देवलोकशब्दवाच्यब्र
ह्मलोक इति परिशेषात्सिद्धं युक्तं विद्यया देवलोक इति वचनमित्युक्तं पूर्वं वेन। साधनसं
पन्नः प्रमाताधिकारीत्युक्तं तत्र कानि साधनानि कियन्तीत्यपेक्षायां तानि विभजते। साधना
नीति। विवेकमन्तरेण वैराग्याभावाद्विवेकस्य प्राथम्येन निर्देशे यमिदमुपादेयमिति विवे
साधनानि नित्यानित्यवस्तुविवेक इहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्तिर्मुमुक्षुत्वानि
च नमन्तरेण हेयाद्रागनिवृत्तिः संभवति अनिवृत्तरागस्य शमाद्यभावात् [illegible] पेक्षयावि
रागस्य पूर्वमुद्देशः शान्तादिहीनस्य मुमुक्षायोगात्ततः प्रागेव शमा[illegible]भिः साधनैः
संपन्नस्य मुमुक्षायाश्च अवश्यंभावात्तस्याश्च पश्चाद्ब्रह्मजिज्ञासा[illegible]ः मुमुक्षान्ता
न्येव साधनानि इत्यभिप्रायः॥ विवेकादीनुद्देशक्रमेण लक्षयति। नित्यानित्यवस्तुविवेकस्ता
वदित्यादिना। नित्यत्वं नाम कालानवच्छिन्नत्वं अनित्यत्वं नाम [illegible]तद्विपरीतत्वं। न नश्यतीति
लोकागमयोर्व्यवहारोपयोगं नित्यं। तद्विपरीतमनित्यमिति वा। तथा नित्यानित्ये च ते वस्तुनी
च नित्यानित्यवस्तुनी तयोर्विवेक इति विग्रहः॥ केचित्तु नित्यानित्ययोर्विमितं शीलं य योस्ते ११

वृत्तिस्तत्रविवक्षिताऽऽभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इत्यादिस्मृतेः। अतस्तत्र ब्रह्मनोद्धा
रणात्। गुणोपसंहारेऽत्र तस्मादिरुद्धज्ञातपोऽश्चान्दिश्रांतशेषत्वज्ञानाजसनेपिनस्तुष
चारिनविद्याधिकारेऽधीयतेयएवमेतद्विदुर्येचामीअरण्येश्रद्धासत्यमुपासत इत्युदाहृ
त्यतत्रश्रद्धात्ववोपसत्यंब्रह्मोपसत इतिव्याख्येयं। सत्यशब्दस्यब्रह्मण्येवसकृत्प्रयुक्तत्वादि
तितेरेवव्याख्यातत्वात्। याज्ञवल्क्यश्चाह। सप्तर्षिनागवी [illegible] लोकेहस्तञ्जताः तावं
तएवमुनयःसर्वारंभविवर्जिताः तपसाब्रह्मचर्येणसंगत्यागेन [illegible] वतिष्ठंते
न७ यावदाभूतसंप्लवमितितस्मादात्मैकत्वपुनरावृत्तिर्विद्यावतामेवेतियुक्तंकर्ममुक्तिहेतुत्वाद्वि
द्यायाः। नचतर्हिमुक्तेरेवविद्यायाःपरमप्रयोजनत्वात्त्रिनैकाग्रस्यतत्रमुक्तमितिवाच्य
। सगुणब्रह्मविदस्तयात्वेपिनिर्गुणब्रह्मविद्याधिकारिणांचित्तैकाग्रतायाएवपरमप्रयोजन
त्वात्। तस्यापिसाक्षात्कारोदयात्प्रागेवप्रमीतस्यब्रह्मलोकगमनोपपत्तेः प्राप्यपुण्यकृतांलो
लोकानुषित्वाशाश्वतीःसमाः इत्यादिस्मृतेश्च सगुणब्रह्मविदोपिब्रह्मलोकंगतस्यतत्रभो
गविद्यावांतरफलंभुक्त्वातस्मिन्नेवोत्पन्नचित्तैकाग्र्यद्वारास्वयंभावितवेदांतवाक्यार्थज्ञानादेव
मुक्तिरितिनियमात्। सवत्वेवंचित्तैकाग्र्यतोपासनायाःपरमप्रयोजनमितिनकिंचिद्दुष्यति
। तस्मात्सर्वएतेपुण्यलोकाभवंतीतिश्रुतेर्निःसनेमितंकर्मणः फलवत्त्वस्यवाचनिकत्वात्पाले
प्युक्तलदेशाभेदे [illegible] त्वितलोकस्यफलात्मनः

ब्रह्मणो ज्ञातत्वादलं विचारेणेति वाच्यं। आपाततो नित्यं वस्तु ब्रह्मैवेत्यवगमेऽपि तस्याद्वितीय
त्वप्रत्यगभिन्नत्वादेरनिर्धारणात् जिज्ञासायां प्रवृत्तिर्युक्तेत्यलमतिविस्तरः ॥ ऐहिकानामि
ति। इह लोके भवा ऐहिकाः प्रतिपन्नशरीरसंबंधिनः स्रक्चंदनवनितान्नपानपशुभृत्या
दिविषयजन्यसुखरूपाः भोगाः कृषिसेवाप्रतिग्रहादिक[illegible] अनित्या ये पापदृष्टाः एव
मामुष्मिका अप्यमृतादिविषयसेवाजन्यानंदाप्सरआदिकर्मसे[illegible]दनित्या भवितुमर्हंती
ति निश्चित्य तेभ्यो नितरां छर्दितान्नवत् जुगुप्सा इहामुत्रार्थफलभो[illegible]रागः। अथवा
ऐहिकानां स्रक्चंदनादिविषयभोगानां कर्मजन्यतयानित्यत्ववत् आमुष्मिकाणामप्यमृ
तादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः ॥
दुःखं सुखं मे निरतिशयं भूयात् दुःखं मे माभूदणुमात्रमपीत्यखिलप्राणिनामस्त्यभिनिवेशः ते
चैवमभिनिविष्टाः पुरुषाकारबलेन सर्वोपायं दृष्टं ततोऽपि न लभंते सुखमात्यंतिकं दुःखाभावं
च कथं केचित्समुद्रयानराजप्रीणनाद्यतिकष्टमनुभूयफलकाले स्वयं न पश्यंति केचित्प्राप्तफ
ला अपि व्याध्याद्युपद्रुताः संतो भोगं न लभंते केचित्तु प्राप्तविषयभोगा अपि भोग्यभार्यापुत्रादिविना
शाद्यतद्विसंवादाद्वान्यैर्बलवद्दस्युक्षितिपादिभिः संछिन्नभोग्या जातस्य हृदयभयेन नानाद्वस्यादिवि
तासंतापादिभिरश्च[illegible]पपि सुखलेशमलभमानाः कृष्णाहरिणाः क्षणाकुञ्जलीवनवधिरादयो बुभु १२
क्षापिपासार्दिताः व्याकुलाकुलमंते। एवं कुत्रचित्कुलसंसारे सुखलवमात्रमननुभवन्नपि कृपणाः राम

नि

नित्यानित्यवस्तुनी [illegible] चेत [illegible] नित्यानित्यवस्तुविवेकस्तावद्गुरुः
सचापाततोऽधिगतस्य दार्ढ्यस्यानुमानकुशलस्य ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमचेतन
मनित्यमितिविवेको भवति। तथाहि। यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्त्तते तद्देवा ज्योति
षां ज्योतिः। नित्यं विभुं सर्वगतं सुसूक्ष्मम्। आकाशवत्सर्वगतश्च नित्यः। अजो नित्यः शाश्वतः। स
त्यं ज्ञानमनन्तं ब्रह्म। सच्चिदानन्दं ब्रह्म रातेर्दातुः परायणम्। यत्र नान्यत्पश्यति नान्यच्छृणो
ति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतमित्यादिश्रुतिभ्यो ब्रह्मणो नित्यत्वं विभुत्वं सत्व
स्य पुंसः प्रतिभाति तथा नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत आत्मा वा इदमेक

नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिल [illegible] मितिवि
वेचनं नित्यानित्यवस्तुविवेकः॥

एवाग्र आसीन्नान्यत्किंचन मिषत्। सदेव सोम्येदमग्र आसीदेकमेवा [illegible] ति। नेह
नानास्ति किंचन। यत्रान्यत्पश्यत्यन्यच्छृणोति अन्यद्विजानाति [illegible] अथ यदल्पं तन्मर्त्यमि
त्यादिश्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्र भेदप्रपंचेऽनित्यत्वं च तस्यैव पुंसः प्रतिभाति तथानुमानमपि
विमतोऽचेतनवर्गोऽनित्यो विभक्तत्वात् घटपटस्तंभादिवदिति। अनेन हि विभक्तस्यानित्यत्वे व
गते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणोऽविभ [illegible] नित्यत्वमर्थादवगतमिति। आकाशा
देश्चोत्पत्तिमत्त्वसाधनेनानित्यत्वमुन्नेत्रं वर्णयिष्यामः। नन्वेवं श्रुत्यनुमानाभ्यां विवेके सति

मृ

उपरमणं पुनर्विषयप्रवणत्वनुत्साहकरणानस्थिरीक[illegible]णमुपरतिरित्यर्थः ननु शमदमयोर्लक्षणा
व्याप्तिर्दमुपरतिलक्षणयोः संकीर्णं प्रतिभाति बहिःप्रवणेन्द्रियव्यापारनिरोधात्मकस्य लक्षणस्यैतस्य
मव तुल्यत्वादित्यपरितोषात्प्रकारांतरेणोपरतिं लक्षयति। अथवेति। विहितानामेवश्यकर्तव्यत
या चोदितानां संध्यावंदनाग्निहोत्रादीनां कर्मणां विधिनात[illegible]लमासे वेदिं कर्वति प्र
जापत्यानिरूप्येष्टिं सार्ववेदसदक्षिणां आत्मन्यग्नीन्समारोप्य[illegible]ः प्रव्रजेद् ब्राह्मणादित्यादिश्रु दि
तिसत्युक्तमार्गेण परित्यागः परिव्रजनं संन्यास उपरतिरित्यर्थः [illegible]त्मज्ञानं
शमस्तावत्श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः दमो बा[illegible]द्व्य
तिरिक्तविषयेभ्यो निवर्तनं निवर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्यः उपरम
णमुपरतिः। अथवा विहितानां कर्मणां विधिना परित्यागः॥

/13 तरंगत्वादेवं मुमुक्षुणानुष्ठेयः तथा च श्रुतयः न कर्मणा न प्रजया धनेन त्यागेनैके अमृ
तत्वमानशुः वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः एतमेव लोकमीप्स
तः प्रव्राजिनः प्रव्रजंति। पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भि
क्षाचर्यं चरंति। तानि वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदित्याद्याः। स्मृतयश्च
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति। त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां श्रूय २३
स्यमर्थं निकृतिः [illegible] यागादिदया दमस्तु मोक्षस्य राम

वद्विमुक्षुविनीतो न स्मृतं किं तु अविरज्य नएवेतिः ... नमादिकं सुखमलित्वलादिदोषदु
षत्वाद्विरागास्पदं तथापि न पारलौकिकादपि विरक्तिरुपपद्यते। तत्रापि दुःखत्वानुमानस्यासंभ
मवे चात्मा स्वपार्जितः सुकृतैर्भवतीति श्रुतिबाधितविषयस्यानुत्थानादिति चेत्। मैवं।
तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुत्या वस्तुबला
बलं वनेन प्रवृत्तयानन्यपरयासापेक्षत्वादनयफलविषयकायाः प्राशस्त्यलक्षणयाविध्येक
वाक्यत्वेनानन्यपरायास्तस्या एव बाधितत्वात्। न हि जन्यं नित्यं भावरूपं दृष्टं श्रुतं वा ऐहिकभोग
वदेवामुत्रस्यापि तत्रापि तेषु भोगेषु वैराग्यमुपपद्यत इति तदुक्तं भगवता व्यासेन ... क्रामस्व

शमादयस्तु शमदमोपरतितितिक्षाश्रद्धासमाधानमुमुक्षाख्याः ॥

लोके यं बुद्धिर्व्यसनत्वमुख्यं। तत्र शमादयस्तु ख्येतेनाद्रतः ... ॥ ... त्विभज
ते। शमादय इति। मननशीलो बहिः प्रवृत्तेर्बाह्येन्द्रियाणां ... रत्वा तन्निरो ... शमः ... न
नंतरं शमो द्रष्टव्यः। पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहो ... यागवत्॥ ... तः क
रणस्य निग्रहो विषयेभ्यो बलादाकर्षणं शमः इत्येतावन्मात्रेण ... निग्रहे प्राप्ते
तेनानिगृहस्य स्वानुकूलत्वाभावादानर्थक्यमित्यागं ... निग्रहे ... ॥ ... इति॥
मननादि संगृहार्थमादिपदं ... अपि द्रष्टव्यं। तत्र ...
निवर्तितानां तेषां वा ह्यान्तरिन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः ... तद्व्यतिरिक्तविषयेभ्यः

तिगुर्वादिवाक्येषु निपता बुद्धिः सा श्रद्धेत्यर्थः चरमतनुबंधं लक्षयति मुमुक्षुत्वमिति मि
थ्यानामविद्यानिरस्ताविद्यातत्कार्यबन्धात्मनाव [illegible] मये कामोक्षेच्छा तद्वत्त्वं मुमुक्षुत्व
मित्यर्थः। ननु यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवतीति श्रुतेः सर्वकाम
विमुक्तस्यैव मोक्षाधिकारात्कथमिच्छाधिकारिविशेषणमितिचेत्तु नायं दोषः। अत्र कामशब्दे विषयेच्छायाए
व कामत्वात्तदभिप्रायाच्छ्रुतिः मोक्षेच्छायास्त्वात्मविषयत्वात् कामत्व [illegible] यथा कामयमानो योऽकामो
निष्काम आत्मकाम आप्तकाम इति श्रुतेरात्मकामस्याप्तकामत्वे [illegible] मुक्तत्वगमादिति। विद्या
निरतो नित्यमनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं। गुरुवेदांतादिवाक्येषु
विश्वासः श्रद्धा। मुमुक्षुत्वं च मोक्षेच्छावत्त्वं एवंभूतः प्रमाताधिकारी शांतो दांत इत्यादि श्रुतेः॥
धिकारिणः शमादिसाधनवत्त्वे श्रुतिं प्रमाणयति। शांतो दांत इति शांतो दांत उपरतस्तितिक्षुः समा
हितो भूत्वात्मन्येवात्मानं पश्येदिति काण्वाः पठंति समाहित इत्यस्य स्थाने श्रद्धावित्तो भूत्वेति मा
ध्यंदिनास्तद्वयपाठानुरोधेन गुणोपसंहारन्यायमाश्रित्येदं शमादयः षट् निर्दिष्टा इति द्रष्ट
व्यम्। शमादेर्विद्यादिहेतुत्वं भगवानप्याह। योगारूढस्य तस्यैव शमः कारणमुच्यते। अप्रशांतस्य कु
तः सुखं तथा। यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः। इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति। मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आगमा
पायिनोऽनित्यास्तांस्तितिक्षस्व भारतेति समाधानं बलाबुद्धिः। मय्येव मनः आधत्स्व मयि बुद्धिं

14

सर्वोपरमः क्रियाभ्यः प्र[illegible]त्याम[illegible]ज्ञानं पुरस्कृत्य संन्यसेदिदं बुद्धिमा-
न् इत्यादयः न्यायस्य पुरुषस्यादृष्टपलिङ्गत्वे यदुपपत्तिक्रमविरोधिन्न तदुपादेयं विपरीतं तु देय-
मिति तदिदमेव स्वात्मजिज्ञासुना वेदान्तविचारे क्रियमाणेन कर्मणामुपयोगो विनापि कर्म तद-
नुष्ठानसिद्धेः नाप्यविरोधः कर्मविदितप्रविचित्तस्य वेदान्तार्थनिर्णयाशक्तेः कर्मणां विचारविरोधि-
त्वात् न चापेतव्रतस्य [illegible] यक[illegible]भोक्तृत्वं सर्वथा तन्निर्विचार्यमाणे [illegible]स्य
ध्यामविरोधात् प्रतिपत्त्यधीनेषु कर्मस्वधिकारेण विरुध्यते येनात्मजिज्ञासुना कर्माणि
न त्यक्तव्यानि स्युः तस्मात् स्मृतिस्मृतिन्यायैरात्मज्ञानागतपायः संन्यासः कर्तव्यः प्राप्तः सोप-
शीतोष्णादिद्वन्द्वसहिष्णुत्वेति तितिक्षा।
रतिरितिभावः॥ शीतोष्णादीत्यादिपदात्मानापमानलाभालाभशो[illegible]॥ श्रवणा-
दावित्यादिशब्दो मननादिसंग्रहार्थः तदनुगुणत्वं च गुरुशुश्रू[illegible]वेदन्तदृष्टा-
दिः श्रवणाद्यनुगुणो विषयो निर्दिश्यते न पुनः सुखवास[illegible]नादिसंग्रहादरेपि श्रवणा-
द्यनुकूलत्वान्न दर्पमठारंभप्रतिग्रहादावपि चित्तसमाधिः[illegible]दीपदिश्यते दंडमा-
कादनं कौपीनं परिग्रहेच्छेयं विसृजेदिति संन्यासकाले[illegible]दंडकौपीनादतिरि-
क्तस्य विनाप्रतिप्रसवं शास्त्रसंग्रहानुपपत्तेरित्यर्थः। समाधिरेकाग्रतत्परत्वमिति याव-
त् गुरुवेदान्तादीत्यादिपदात्समुत्थितस्थासपरा[illegible]ग्रहः विश्वास इदमित्थमेव नान्यथे-

सन्निधाने दृष्टप्रत्यक्षस्वरूपतया प्रतीयमानत्वाद्विषयत्वोपपत्तिरित्यभिप्रेत्याह ।प्रमेयमिति ।प्र
मेयत्वमज्ञातत्वं । अयं भावः ब्रह्मात्मवस्तुनो विषयत्वस्याप्रसिद्धेर्न विचारप्रवृत्तिः संभवति
उद्देश्यविषययोः प्रसिद्धेः । तथापि यथावत्प्रसिद्ध्यभावेन विचारप्रवृत्तिरनुपयोगात् । तथा चैकेन वि
रूपेण प्रसिद्धं ब्रह्मात्मवस्तु द्विरूपविचारेण तद्याथात्म्यं निर्णेयं । तदिदं ब्रह्मपदस्य निरतिशयम प
हत्त्ववति सामान्येन प्रसिद्धत्वादात्मपदस्य च प्रतीचि सामान्येन प्रसिद्धेरयमात्मा ब्रह्मेत्यादौ
समभिव्याहारादैक्यस्याप्यापाततः प्रसिद्धेस्तद्विशेषस्य च पारोक्ष्ये ... नधिकरणत्व
स्य देहेन्द्रियमनोबुद्धिप्राणाहंकृतिविलक्षणत्वादि प्रत्यगभिन्नसच्चिदानन्दानन्तब्रह्म
विषयो जीवब्रह्मैक्यं शुद्धं चैतन्यं प्रमेयं
15 रूपत्वस्य चाप्रसिद्धेः सामान्यतः प्रसिद्धवस्तूद्देशेन तद्विशेषनिर्धारणाय विचारप्रवृत्त्युपप
त्तिरिति । यद्वा परोक्षतः प्रसिद्धब्रह्मात्मवस्तूद्देश्य तत्स्वरूपसाक्षात्काराय विचारप्रवृत्त्युपप
त्तिरिति । तथा च श्रुतिः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यात्मसाक्षा
त्कारमनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां सह श्रवणमनुवेद्यं विध
त्ते । स्मृतिरपि श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः मत्वा च सततं ध्येय एते दर्शन
हेतव इति ॥ ननु प्रधानादीनामपि कपिलकणादादिस्मृतिसिद्धानां वेदान्तवाक्यविषयत्वा
त्कथं जीवब्रह्मैक्यस्य विषयत्वसंकीर्तनमित्यत आह ॥

न्निश्चयादिति। स्वस्वा [illegible] नेतत्य [illegible] संयतेन्द्रियः [illegible] । स्वात्मस्वरूपध्यानस्वसंशयात्माविनश्यती
तिच मुमुक्षुत्वेपि मुमुक्षुर्वैशरणमहं प्रपद्ये। ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ते
भूयः तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणीति स्मृतिस्मृतौ द्रष्टव्ये॥ एवं विशेष
णविशिष्टो वेदान्ताधिकारीति निरूपिते विषयरूपं च नमुदाहरति। उक्तं च प्रशान्तेति। प्रशान्तचि
त्ताय शान्ताय जितेन्द्रियाय दान्ताय प्रहीणदोषाय निर्धूतनिमित्तस्वान्ताय यथोक्तकारिणे काम्यनिषि
द्धवर्जनपुरःसरं नित्याद्यनुष्ठानलब्धेश्वरप्रीतये गुणान्विताय विवेकवैराग्यपरतितितिक्षा

उक्तं च प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥

समाधानयुक्ताय सर्वदा गुरुमनुगताय स्वज्ञातत्वं एवंभूताय मुमुक्षवे [illegible] तत्त्वज्ञानसततं गुरु
णा देयमिति श्लोकार्थः॥ तदेवमधिकार्यनुबन्धो निरूपितः इदानीं [illegible] विषयानुबन्धं प्रतिपादयति
। विषय इति। क्षीरनीरवत्परस्परविभिन्नयोः समानाभिसारस्यैक [illegible] र्जीवब्रह्मणोरपि
स्वरूपतो भिन्नयोरैक्यं मिथ्याभाव इति शंकाम्ब्यात्मात्मा मार्द्धिति [illegible] । शुद्धचैतन्यमिति। चै
तन्यस्य शुद्धत्वं सर्वधर्मातीतत्वमेकरसत्वं। ननु [illegible] विषयत्वं आवृता
प्रागपि विचारात्तत्स्वप्रकाशं स्वयमेवावभासते [illegible] स्वरूपेणावभासमानत्वेपि परिपूर्ण